Shri Sharadakusumanjalih

# શ્રીશારદાકુસુમાઞ્જલિઃ

## Document Information

Text title : Shri Sharadakusumanjalih

File name : shAradAkusumAnjaliH.itx

Category : devii, vAsudevanElayath, devI, sarasvatI

Location : doc_devii

Description/comments : From Bhaktitarangini by Prof. P.C. Vasudevan Elayath

Latest update : December 25, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2022

*sanskritdocuments.org*

# શ્રીશારદાકુસુમાઞ્જલિઃ

શ્રીરામકૃષ્ણગુરુદેવનિબદ્ધભાવા ।
શ્રીરામકૃષ્ણપરિપૂજિતપાદપદ્મા ।
શ્રીદક્ષિણેશ્વરગતા ભવતારિણી સા
શ્રીશારદા વિજયતે જગદેકમાતા ॥ ૧॥

શ્વેતામ્બરાવૃતવિશુદ્ધમનોજ્ઞગાત્રીં
શાન્તપ્રસન્નવદનાં કરુણાર્દ્રનેત્રામ્ ।
ધ્યાયામિ તાં હૃદયપદ્મસુખાસનસ્થાં
શ્રીશારદાં પરમહંસમહાવિભૂતિમ્ ॥ ૨॥

અમ્બ પ્રસીદ ભુવનેશ્વરિ માતૃદેવિ,
ત્વામપ્રમેયમહિમાર્જિતાવિશ્વપૂજામ્ ।
ક્ષાન્ત્યાધરીકૃતધરાં સરળાન્તરઙ્ગાં
નિશ્શેષદુઃખશમનીં શરણં પ્રપદ્યે ॥ ૩॥

વિદ્યાવિવાદજટિલત્વવિહીનભાવા
સ્વાત્માનુભૂતિમધુરા સતતં પ્રસન્ના ।
આનન્દરૂપિણિ પદાબ્જસમાશ્રિતાનાં
શાન્તિપ્રદા વિજયસે લળિતામ્બિકે ત્વમ્ ॥ ૪॥

યોગેશ્વરેશ્વરમહાગુરુધર્મપત્નિ,
સર્વાર્થદે સકલશક્ત્યવતારરૂપે ।
આર્તપ્રપન્નપરિપાલનબદ્ધદીક્ષે
શ્રીશારદામ્બ જગદમ્બ નમો નમસ્તે ॥ ૫॥

દિવ્યાનુભૂતિમુદિતૌ પિતરૌ વિધાય
ત્વં લબ્ધવત્યસિ વિશિષ્ટનવાવતારમ્ ।
યેન પ્રસિદ્ધિમભજત્કિલ ધર્મવાટી
વઙ્ગેષુ મઙ્ગળતમા જયરામવાટી ॥ ૬॥

ધ્યાનં જપં ચ પરિપૂજનમમ્બ, બાલ-
    લીલાસુ તત્પરતયૈવ ચકર્થ નિત્યમ્ ।
અધ્યાત્મજીવિતમનન્તરભાવિમન્યે
    ધન્યા વિશુદ્ધહૃદયા સમસૂચયસ્ત્વમ્ ॥ ૭॥

બાલા વધૂસ્ત્વમયિ કેવલપઞ્ચવર્ષા
    પ્રૌઢો યુવા નનુ વરઃ સ તુ રામકૃષ્ણઃ ।
હંહો વિરક્તહૃદયશ્ચ ભવદ્વિવાહો
    જાતસ્તથાપિ ચ પરસ્પરભાવબદ્ધઃ ॥ ૮॥

શ્રીશારદાપરમહંસવિશુદ્ધદિવ્ય-
    દામ્પત્યમદ્ભુતતમપ્રણયપ્રભાવમ્ ।
વિશ્વોપદેશજનનં જયતાત્ ગુરુભ્યા -
    માભ્યાં નમોઽસ્તુ સતતં જગતઃ પિતૃભ્યામ્ ॥ ૯॥

કાલે ગતે ચ યુવતી ભવતી જગામ
    શ્રીદક્ષિણેશ્વરમનુપ્રિયવાસભૂમિમ્ ।
આધ્યાત્મિકોન્નતતલે વિહરન્તમેનં
    ત્વય્યદ્ભુતપ્રણયનિષ્ઠમવાલુલોકે ॥ ૧૦॥

શ્રીશારદામ્બ નિગમાદૃત ભર્તૃસેવા
    લબ્ધાવકાશમુદિતા વિજહૌ વિષાદમ્ ।
અધ્યાત્મભૌતિકસમન્વયશિક્ષણેન
    રેમે ચ તદ્ગુરુદયાશિશિરાન્તઙ્ગા ॥ ૧૧॥

ત્વં તત્ર પુણ્યચરિતા નિગૃહીતચિત્તા
    શ્રીરામકૃષ્ણચરણાર્પિતસર્વભાવા ।
આનન્દિતા વિવિધસેવનમાચરન્તી
    પૂર્ણામવાપિથ કૃતાર્થતમામવસ્થામ્ ॥ ૧૨॥

નાનાવિધેષુ કઠિનેષુ પરીક્ષણેષુ
    હે દેવિ લબ્ધવિજયા વિનયાવનમ્રા ।
સમ્માનિતા ગુરુવરેણ સમસ્તભક્ત-
    વૃન્દેન પૂજિતપદા સુતરાં ચકાસે ॥ ૧૩॥

ત્વં ષોડશીમહિતપૂજનમાત્મનાથ

યોગેશ્વરેણ વિહિતં પરિગૃહ્ય શાન્તા ।
સુવ્યક્તશક્તિભરિતામલચિત્તપદ્મા
ધન્યા બભવિથ જગદ્ગુરુધર્મપત્ની ॥ ૧૪॥

શુશ્રૂષયા પરમહંસગુરેસ્તદીય-
દિવ્યોપદેશમનનેન ચ પૂર્ણબોધા ।
ભક્તાવલીપરિનિષેવિતપાદપદ્મા
ત્વં શોભસે સ્મ જનપાવનિ માતૃદેવિ ॥ ૧૫॥

વન્યે ચ તસ્કરપતેઃ પથિ સૌમ્યભાવ-
માપાદ્ય વન્ત્યપિતૃભાવ પુપાદધાને ।
સ્નેહાત્મિકે સકલમાનસહંસિ દેવિ
તુભ્યં નમઃ પતિતપાવનિ હે ભવાનિ ॥ ૧૬॥

હે માતૃદેવિ ગુરુદેવ મહાસમાધે-
ર્વાગનન્યહૃદયા તમનુસ્મરન્તી ।
તદ્દિવ્યદર્શનનિરસ્તસમસ્તશઙ્કા
સંપ્રાપિથ પ્રથિતનિત્યસુમઙ્ગલી ત્વમ્ ॥ ૧૭॥

તીર્થાટનેન સુસમાહિતચિત્તવૃત્તિ-
રાતન્વતી હૃદયનાથનિદેશમાત્રમ્ ।
સ્ત્રીધર્મસુસ્થિરધિયા પતિગેહમેત્ય
ક્લેશેન વસ્તુમુપચક્રમિષે ત્વમેકા ॥ ૧૮॥

દારિદ્ર્યમુત્કટમસજ્જનદુર્વિમર્શા-
મન્યત્ર પીટનમહો ભવતી વિષેહે ।
શ્રીરામકૃષ્ણભજને જપપૂજનાદૌ
નિષ્ઠાન્તવર્ધત દિનમ્પ્રતિ નિર્વિશઙ્કમ્ ॥ ૧૯॥

ધીરા જિગાય પરુષાગ્નિપરિક્ષણેઽસ્મિ-
ન્નાત્મશ્વરાર્પિતાવિશુદ્ધદૃઢાન્તરઙ્ગા ।
ક્ષીણાપિ દિવ્યતનુકાન્તિરશેષપૂજ્યા
સંરેજિષે પ્રતિપ્રદીવ શશાઙ્કલેખા ॥ ૨૦॥

જ્ઞાત્વૈતદમ્બ, સહસા ગુરદેવશિષ્યૈ-
રત્યન્તભક્તિવિનયાવનતાન્તરઙ્ગૈઃ ।
સમ્પૂજિતા સુવિહિતાખિલકાર્યજાતા

સસ્મર્થ હન્ત ગુરુદેવદયામનન્તામ્ ॥ ૨૧॥

અમ્બ પ્રસૂતિકઠિનવ્યથયા વિનૈવ
લબ્ધ્વા વિનિતહૃદયાંસ્તનયાનનેકાન્ ।
પ્રેમપ્રકર્ષલહરીતરલાન્તરઙ્ગા
ત્વં દેવિ સસ્મરિથ ભર્તૃગિરં સહર્ષમ્ ॥ ૨૨॥

માતસ્તદાપ્રભૃતિ વિશ્રુતકાળિઘટ્ટં
ત્વં પાવનીમપિ મુદા જયરામવાટીમ્ ।
શ્રીરામકૃષ્ણચરણસ્મરણે નિમગ્ના
સદ્ભક્તપૂજિતપદા ચિરમધ્યવાત્સીઃ ॥ ૨૩॥

યોગત્રયેશ્વરિ વિશુદ્ધવિબોધરૂપે
મન્ત્રોપદેશમખિલં ગુરુદેવદત્તમ્ ।
કારુણ્યપૂર્ણહૃદયા દદિથ પ્રપન્ન-
લોકાય હે પતિતપાવનિ માતૃદેવિ ॥ ૨૪॥

આધ્યાત્મિકોન્નતતલે વિહરન્ત્યથાપિ
ગૃહ્યં ચ બન્ધમધૃથા નનુ ચિત્રમેતત્ ।
યદ્વા તવૈતદુચિતં ખલુ રામકૃષ્ણ-
દેવસ્ય ધર્મગૃહિણી ભવતિ વિશુદ્ધા ॥ ૨૫॥

શ્રીશારદામ્બ ભવતી નિજજીવિતેન
વૈચિત્ર્યબન્ધુરતમેન વિશુદ્ધિભાજા ।
પૂર્ણપ્રભાવમખિલેશ્વરિ ભારતીય-
સ્ત્રીત્વસ્ય દર્શિતવતી મહિતે નમસ્તે ॥ ૨૬॥

ધ્યાયામિ ત્વાં દધાનાં જગદતિસુભગં સ્થૂલરૂપં વિચિત્ર
ચૈતન્યં ચાપિ સૂક્ષ્મં વપુરખિલપદાર્થેષુ નિત્યં નિગૂઢમ્ ।
ચિલ્લીનાનિત્યતૃપ્તાં પ્રણતજનમનોદર્પણોદ્ભાસિરૂપાં
દેવીં શ્રીશારદામ્બાં જય જનનિ નમસ્તે નમસ્તે નમસ્તે ॥ ૨૭॥

સમર્પણં

શ્રી શારદામ્બ મહિતે તવ સન્નિધાને
"તારવલીય"મયિ દેવિ સમપ્યમાણા ।
હે વિશ્વરૂપિણિ તવાસ્તુ વિનીતશુદ્ધ
નીરાજનં ચ લલિતં શિવદે નમસ્તે ॥

ઇતિ શ્રીવાસુદેવન્ એલયથેન વિરચિતા શ્રીશારદાકુસુમાઞ્જલિઃ સમાપ્તા ।

*Shri Sharadakusumanjalih*

pdf was typeset on December 25, 2022

Please send corrections to *sanskrit@cheerful.com*